वृद्धि अंगुल ८४ ते हनी कोस १४

सर्व

अंतर अंगा

मनुपोर
अं ३८
कोश ३० उकुस १२

अंतर रमा

गंगा
सवीशा
कोश अं १५

अंतर अंग

अनुचनु अं १२
कोश ३५

अंतर अं १६

उतर

अंतर अं २४
दे खेरा

कोश ३०

मनुपोर अं ३५
कोश
उकु अं १२

अंतर
अं २१

सोमपाठ
अंगुल
अनुकु अं

अंतर अं ४५

नद्या सततनो पारलो शापनमोता ब्यनद न
जडु पाथसीये नद्या सततीस्नाधीधो पंच
धा स्वचेत तेढु जाराषा तेढुन जडद
गीतामगा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

Takshashila Project

॥ ॐ नमः श्रीगणेशाय ॥ श्रीऋग्वेदाय रुद्रजपस्य ऋषिदेवताछंदां
सि तद्यथा ॥ ॐकारस्य ब्रह्मा ऋषिः अग्निर्देवता दैवी गायत्री छंदः भू
रादीव्याहृतीनां यथाक्रमं विश्वामित्रजमदग्निभरद्वाजगोतमात्रिव
सिष्ठकश्यपा ऋषयः ॥ अग्निवायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदेवा दे
वता ॥ गायत्र्युष्णिगनुष्टुप्बृहती पंक्ति त्रिष्टुप् जगतिछंदांसि ॥ तत्स वि
तुरिति ॥ ॥ ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचो
दयात् ॥ १ ॥ आपो हि ष्ठेति त्रिचिंराः सिंधुद्वीपो वा ऋषिः आपो देवता ॥ गा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

अ.२.२०।९।१

यत्री छन्दः ॥ ॐ आपो हिष्ठामयो भुव स्तानं ऊर्जेदधातन ॥
महेरणा य चक्षसे । यो वः शिव त मोर सस्तस्य भाजयतेहनः ।
उशती रिव मातरः । तस्मा अरंग मामवो यस्यक्षयो यजिन वथ ।
आपोजन यथा चनः ॥ शन्नो देवी रभिष्टय आपो भवन्तु पीतये ।
शंय्यो रभि स्रवन्तु नः ॥ ईशाना वार्याणां क्षयंतिश्चर्शणीनां ।
आपोया चामि भेशजं । अप्सुमे सोमो अब्रवी दंतर्विश्वानि
भेशजा । अग्निं च विश्व संभुवं । आपः पृणी तभेशजं वरूथंन
न्वे-३ मम ज्योक्च सूर्यं दृशे । इदमाप प्रवहत यत्किंच दुरितं
मयि । यद्वा हमभि दुद्रोह यद्वाशेप उतानृतं । आपो अद्यान्व
वचारिशं रसेन समगस्महि । पयस्वा नग्न आगहितंमासं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

सूर्जं वर्चसा । स सुशिप्र स्तदपसो दिवा नक्तं च स सुषी:
वरेण्य क्रतु रहमा देवी रवसे हुवे ॥ त्रिरश्च इन्द्रोऽनुष्टुप
एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना । शुद्धैरुक्थैर्वावृध्वांसं
॥२॥ शुद्ध आशीर्वान्ममत्तु । इन्द्र शुद्धो न आगहि शुद्धः शुद्धाभिरूतिभिः ॥२॥
शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्य । इन्द्र शुद्धो हि नो रयिं
शुद्धो रत्नानि दाशुषे । शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि ।

Takshashila Project

शुद्धा मम द्विषो मह्यो इडः शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे शुद्धो वृत्रा
णि जिघ्नसे शुद्धो वाजं सिषाससि ॥ ऋतं चेति त्र्यृचस्य अघमर्षण ऋषिः ना
व वृत्तो देवता अनुष्टुप् छंदः ॥ ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत ॥ त
तो रात्र्यजायत ततः समुद्रो अर्णवः ॥ समुद्रादर्णवादधि संवत्सरो ।
अजायत ॥ अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ सूर्याचंद्रमसौ
धाता यथापूर्वमकल्पयत् ॥ दिवं च पृथिवीं चांतरिक्षमथो स्वः ॥ ७ ॥ १
॥ अंबवतीनां वसिष्ठ ऋषिः विश्वेदेवा देवता ॥ त्रिष्टुप् छंदः ॥ अंबवतीः पार

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

३

यं त्वेतं पूर्वं तिवबोयथा। अन्यानं तं यमाकेतं यएवेदमिति ब्रवन्। जाया
केतुं पुरुस्पृहं नारतीब्रह्मवर्द्धनी। संजानानामहीमाता यएवेदमि
ति ब्रवत्। इंद्रस्त्वं किं विनुप्रनुं नानुमेयं सरस्वती। येन सूर्यमरोचयद्ये
नेमे रोदसी उने। ॥१॥ शं वो अद्भिः शं व आपः शं वो नवंतु मरुतः स्वर्का
ः। शं वः प्रजाभ्यः शमु यंतु पापं शं वः पर्जन्यो अभिवर्षतु। शं व इंद्रः शं
॥३॥ मितानाशं वो नवं दूषसो विनातीः। शं वो नवं दूषसो विनातीः। शं वो
वसवो रुद्रा आदित्याः सदंतु शं वो मित्रावरुणावश्विना। शं वो वि ३

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

स्तुत्रजग्मासंरराणोनुस्वधांत्वमुहिलोकेऽस्मिन्॥शंवोनवत्तनुवनस्पय
स्पतिःशंवोनवद्विपदेशंवत्तुष्पदे॥५॥जुषस्वाग्नेऽअंगिरःकाण्वंमेध्या
तिथिंमात्वासोमस्यबर्हिहसुतासोमधुमत्तमः॥त्वामग्नेऽअंगिरसस्तम
श्लोवस्वदेववीतमः॥आशांतमुशांतमाभिरिष्टिभिःशांतिस्वस्तिमकुर्वी
ता॥शंवःकनिक्रदद्देवःपर्जन्योऽअभिवर्षतु॥ओषधयःप्रतिधीयतां॥शंनो
द्यावापृथिवीशंप्रजाभ्यःशंनोऽअस्तुद्विपदेशंचतुष्पदे॥७॥शंनऽइन्द्रा
ग्नीन्नवतामवोभिःशंनऽइन्द्रावरुणारातहव्या॥शमिन्द्रासोमासुविताय

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

४

शंयोः शन्न इंद्रापूषणा वाजसातौ। शन्नो भगः शमु नः शंसो अस्तु शन्नः
पुरंधिः शमु संतु रायः। शंनः सत्यस्य सुयमस्य शंसः शन्नो अर्यमा पुरु
जातो अस्तु। शंनो धाता शमु धर्त्ता नो अस्तु शन्न उरूची भवतु स्वधाभिः।
शं रोदसी बृहती शंनो अद्रिः शन्नो देवानां सुहवानि संतु। शन्नो अग्नि
ज्योतिरनीको अस्तु शन्नो मित्रावरुणावश्विना शं। शंनः सुकृतां सुकृता
नि संतु शंन इषिरो अभिवातु वातः। शंनो द्यावापृथिवी पूर्वहूतौ शमंत ४
रिक्षं दृशये नो अस्तु। शंन ओषधीर्वनिनो भवंतु शंनो रजसस्पतिरस्तु जि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

ष्णुः॥५॥ शं न इंद्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः। शं
नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु। शं नः सोमो भ
वतु ब्रह्म शं नः शं नो ग्रावाणः शमु संतु यज्ञाः। शं नः स्वरूणां मितयो
भवंतु शं नः प्रस्वः शम्वस्तु वेदिः॥ शं नः सूर्य उरुचक्षा उदेतु शं नश्च
तस्रः प्रदिशो भवंतु शं नः पर्वता ध्रुवयो भवंतु शं नः सिंधवः शमु
संत्वापः। शं नो अदितिर्भवतु व्रतेभिः शं नो भवंतु मरुतः स्वर्काः। शं
नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः। शं नो दे

Takshashila Project

वःसविताचायमाणःशंनोभवंतूषसोविभातीःशंनःपर्जन्योभव
तुप्रजाभ्यःशंनःक्षेत्रस्यपतिरस्तुशंभुः॥१॥शंनोदेवाविश्वदेवा
भवंतुशंसरस्वतीसहधीभिरस्तुशमभिषाचःशमुरातिषाचःशंनो
दिव्याःपार्थिवाःशंनोअप्याः॥शंनःसत्यस्यपतयोभवंतुशंनोअर्वंत
ःशमुसंतुगावःशंनःऋभवःसुकृतःसुहस्ताःशंनोभवंतुपितरो
हवेषु॥शंनोअजएकपाद्देवोअस्तुशंनोहिर्बुध्न्यः॥१॥शंसमुद्रःशं ५
नोअपांनपात्पेरुरस्तुशंनःपृश्निर्भवतुदेवगोपाः॥आदित्यारुद्रावं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

सर्वोजुषंतेदंब्रह्मक्रियमाणंनवीयःस्टएवंतनोदिव्याः।पार्थिवासो
गोजाताउतयेयज्ञियासःयेदेवानांयज्ञियायज्ञियानांमनोर्यजत्रा
अमृताऋतज्ञाः।तेनोरासंतामुरुगायमद्ययूयंपातस्वस्तिभिःस
दानः।।२।।स्वस्तिनोमिमीतानानांस्वस्त्यात्रेयऋषिः।विश्वेदेवादेवता।
तिस्रोजगत्यस्त्रिष्टुभोवा।।अन्त्याद्यनुष्टुभौ।।ॐस्वस्तिनोमिमीता
मश्विनाभगःस्वस्तिदेव्यदितिरनर्वणःस्वस्तिपूषाअसुरोदधातुनः
स्वस्तिद्यावापृथिवीसुचेतुना।स्वस्तयेवायुमुपब्रवामहैसोमंस्वऽ

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

स्तिभुवनस्ययस्पतिःबृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्या।
सोभवंतुनःविश्वेदेवानोअद्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तये।
देवाअवंत्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपात्वंहसः।स्वस्तिमित्रावरुणा
स्वस्तिपथ्येरेवतिस्वस्तिनइंद्रश्चाग्निश्चस्वस्तिनोअदितेकृधिस्वस्ति
पंथामनुचरेमसूर्याचंद्रमसाविवपुनर्ददताघ्नताजानतासंगमे
महिस्वस्त्ययनंतार्क्ष्यमरिष्टनेमिंमहद्भूतंवायसंदेवतानांअसु ६
रघ्नमिंद्रसखंसमत्सुबृहद्यशोनावमिवारुहेमाअंहोमुचंमांगिरः

नं ३

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

संगयंच स्वस्तीया त्रेयं मनसा चता रक्षयं प्रयत प्रागी शरणं प्रपद्ये स्वस्ती सं बाधे स्वभयन्नोस्तु ॥ मधुछंदः विश्वामीत्र पवमान सोमः गायत्री ॥ ॐ स्वादिष्टया मदिष्ठया पवस्वसोमधारया । इन्द्राय पातेव सुतः ॥१॥ रक्षोहा विश्वचर्षणीरभियोनिमयो हतम. द्रुणा सधस्थ मा सदत ॥२॥ वरिवोधा तमो भव महिष्ठो वृत्र हन्तमः पर्षि राधो मघोनाम ॥३॥ अभ्यर्ष महानां देवानां वीतिमर्न्धसा अभिवाजः मुत श्रव: ॥४॥ त्वामच्छा चरामसि तदिदर्थं दिवे दिवे इन्द्रो त्वेन आशसः ॥५॥ पुनातिते परिस्रुतं सोमं सूर्यस्य दुहिता वारेण शश्वता तना ॥६॥ तमीः मण्वीः समर्य आ गृभ्णन्ति योषणो दश स्वसारः पार्ये दिवि ॥७॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

तमीं हिन्वन्त्यग्रुवो धमन्ति बाकुरं दृतिम् त्रिधातुवा
रणं मधु ॥८॥ अभि-३ ममघ्न्याउत श्रीणन्ति धेनवः
शिशुम् सोम मिन्द्राय पातवे ॥९॥ अस्य दिन्द्रो मदेष्वा
विश्वा वृत्राणी जिघ्नसे शूरो मघा चमंहते ॥१०॥ ९।१
॥७॥ ॥ मधुछंदः अग्नि गायत्री ॥ ॥७॥

अग्नि मीळे पुरोहितं यज्ञस्य देव मृत्विजम् होतारं
रत्नधातमम् ॥१॥ अग्नि पूर्वे भि-ऋषि भिरीड्यो नूतनै
रुत सदेवां एह वक्षति ॥२॥

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

सदेवाँ एह वक्षति। अग्निना रयिमश्नवत्पोषमेव दिवेदिवे यशसंवी
रवत्तमं। अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि। स इद्देवेषु गच्छति।४
अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। देवो देवेभिरागमत्॥
॥२५॥ यदंग दाशुषे त्वमग्ने भद्रं करिष्यसि। तवेत्तत्सत्यमंगिरः। उ
पत्वाग्ने दिवेदिवे दोषावस्तर्धिया वयं। नमो भरंत एमसि। राजंतम
ध्वराणां गोपामृतस्य दीदिविं। वर्धमानं स्वे दमे। स नः पितेव सूनवेऽग्ने
सूपायनो भव। सचस्वा नः स्वस्तये॥२५॥ येनेदं मितिति शिवसंकल्पस्तबि।

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

शिवोदेवता॥त्रिष्टुप्छंदः॥यद्वादसीज्योतिष्मती॥३ येनेदंभूतंभुवनं
भविष्यत्परिगृहीतममृतेनसर्वं॥येनयज्ञस्तायतेसप्तहोतातन्मेमनः
शिवसंकल्पमस्तु॥येनकर्माण्यपसोमनीषिणोयज्ञेकृण्वंतिविद
थेषुधीराः॥यदपूर्वंयक्षमंतःप्रजानांतन्मे॥येनकर्माणिप्रतिरंति
धीरायतोवाचामनसातानिदंतियस्याश्चित्तमनुसंवरंतिप्राणिन
स्तन्मे॥यस्मिन्नृचःसामयजूंषियस्मिन्प्रतिष्ठितारथनाभावि ७
वाराः॥यस्मिंश्चित्तंसर्वमोतंप्रजानांतन्मे॥यत्प्रज्ञानमुतचेतोधृ

Takshashila Project

तिश्चयज्ज्योतिरंतरमृतंप्रजासुयस्मान्नऋतेकिंचनकर्मक्रियतेतं
न्मे॰॥३॥सुखारथिरश्वानिवयंमनुष्यान्नेनीयतेभीशुभिर्वाजिनइ
वाहृत्प्रतिष्टंयदजिरंयविष्टंतन्मे॰॥॥यज्जाग्रतोदूरमुदेतिदैवंतदु
सुप्तस्यतथैवैतिदूरंगमंज्योतिषांज्योतिरेकंतन्मे॰॥॥येनेदंसर्वंजग
तोबभूवतदेवापिमहतोजातवेदाः॥तदेवाग्निंतमसोज्योतिरेकंत प॰
न्मे॰॥॥येनद्यौरुग्रापृथिवीचांतरिक्षंतत्पर्वताःप्रदिशोदिशश्चयेने
दंजगद्व्याप्तंप्रजानांतन्मे॰॥॥येपंचपंचादशशतंशतंचसहस्रंचनियुतंन्य

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

१२ ५

८ हृद्वं वा ति यन्नु वि त्ते ष्टकानं ञ्जारीरं तन्मे ॥४॥ ये मनो हृदयं ये च देवा दिव्या आ

१८ पो यः सूर्यरश्मिः ये श्रोत्रं चक्षुषी संचरं तन्मे ॥५॥ यद वै षष्ठं त्रिंशतं श

शारीरं यज्ञस्य गुह्यं नवनावमाद्यं षष्ठं पंच विंशातं पतारं च तन्मे ॥६॥ वेदा

हमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् [illegible] यो नि परि

पश्यंति धीरा तन्मे ॥७॥ अचिंत्यं चाप्रमेयं च व्यक्ताव्यक्तपरं [illegible] सूक्ष्मा

सूक्ष्मतरं ज्ञानं तन्मे ॥८॥ अस्ति विनाशायिना सर्वमिदं नास्ति पुनः स शि

रंबहुष्टं ध्रुवं अस्ति नास्ति हितं तं मध्यमं परं तन्मे ॥९॥ अस्ति नास्ति

Takshashila Project

विपरीतोऽथवाहो ॥ अस्तिनास्तिसर्ववादद्वंगुह्यं ॥ अस्तिनास्तिपरोत्परो
च२ यत्परंतन्नमः ॥ परात्परतरंयस्यतत्परात्रिवयत्परंतत्परात्परतरो
ज्ञेयंतन्नमः ॥ परात्परतरोब्रह्मत्वतत्परात्परतरोहरिः ॥ तत्परात्परत
रोह्येषंतन्नमः ॥ रस्यां ॥ गोनिर्जुष्टोधनेनह्यायुषांचबलेनवाप्रजया
पशुभिःपुष्कराद्यंतन्नमः ॥ अयतःप्रणवोनित्यंपरमंपुरुषोत्तमं
ओंकारंपरमात्मानंतन्नमः ॥ योविविदादिषुगायत्रीसर्वव्यापिमहे
श्वरानायद्विरुक्तंतथाहृदिस्थंतन्नमः ॥ योवैविदमहादेवंपरमंपुरुषो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥ आब्रह्मस्तंबपर्यंतं त्रैलोक्यं सचराचरं ॥ तस्माद्भितं जगद्ध्याहं तन्मे ॰ ४

आब्रह्मस्तंबपर्यंतं त्रैलोक्यं सचराचरं । तस्मोद्भितं जगं ध्याहं तन्मे मनः ॰ १४

२०

त्र मां यः सर्वं यस्य विसर्वं तन्मे ॰ ॥ यो सौ सर्वेषु वेदेषु पठ्यते ह्यज ईश्व

रः ॥ अकायो निर्गुणो ध्यात्वं तन्मे ॰ ॥ कैलाशशिषरे रम्ये शंकरस्य शु

ने गृहे ॥ देवतास्तत्र मोदंति तन्मे ॰ ॥ कैलाशशिषराभासं हिमवद्गि

रिसंस्थितं ॥ नीलकंठं त्रिनेत्रं च तन्मे ॰ ॥ यद्दमं शिवसंकल्पं सदा ध्या

यंति ब्राह्मणाः ॥ ते परं मोक्षं गमिष्यंति तन्मे ॰ ॥ त्र्यंबकं यजामहे सु

गंधिं पुष्टिवर्द्धनं ॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् त ॰१०

न्मे ॰ ॥ १४ ॥ ॐ सहस्रशीर्षेति नारायण ऋषिः पुरुषो देवता अनुष्टु

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

प्छंदः॥ अंत्या त्रिष्टुप्॥ ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स
भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भ
व्यं॥ उतामृतत्वस्येशानो यदन्नेनातिरोहति॥ एतावानस्य महिमा।
तो ज्यायांश्च पूरुषः॥ पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥
त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः॥ ततो विष्वङ् व्यक्राम
त्साशनानशने अभि॥ तस्माद्विराळजायत विराजो अधि पूरुषः॥ स
जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ यत्पुरुषेण हविषा दे

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

२२

वायज्ञमतन्वत॥वसंतोऽस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः॥तंयज्ञं
बर्हिषिप्रौक्षन्पुरुषंजातमग्रतः॥तेनदेवाअयजंतसाध्याऋषयश्चये
॥तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यं॥पशूंस्तांश्चक्रेवायव्यानारण्या
ग्राम्याश्चये॥तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे॥छंदांसिजज्ञिरे
तस्माद्यजुस्तस्मादजायत॥तस्मादश्वाअजायंतयेकेचोभयादतः॥
गावोहजज्ञिरेतस्मात्तस्माज्जाताअजावयः॥११॥यत्पुरुषंव्यदधुःक २२
तिधाव्यकल्पयन्॥मुखंकिमस्यकौबाहूकाऊरूपादाउच्येते॥ब्राह्म

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

णोस्यमुखमासीद्बाहूराजन्यः कृतः।ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रो
ऽअजायत।चंद्रमामनसोजातःचक्षोःसूर्योऽअजायत।मुखादिंद्रश्चा
ग्निश्चप्राणाद्वायुरजायत।नाभ्याऽआसीदंतरिक्षंशीर्ष्णोद्यौःसमव
र्त्तत।पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँऽअकल्पयन्।सप्तास्यासन्प
रिधयस्त्रिःसप्तसमिधःकृताः।देवायद्यज्ञंतन्वानाऽअबध्नन्पुरुषंप
शुं।यज्ञेनयज्ञमयजंतदेवास्तानिधर्म्माणिप्रथमान्यासन्।तेहना
कंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः॥ [illegible] ॥ऽअहंरुद्रेभिर्वा 10/124/2

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

ऋषिका। आत्मा देवता। त्रिष्टुप्छंदः। द्वितीया जगती॥ ॐ अहंरुद्रेभिर्वसु
भिश्चराम्यहमादित्यैरुत विश्वदेवैः। अहंमित्रावरुणोभा बिभर्म्यह
मिंद्राग्नी अहमश्विनोभा। अहंसोममाहनसंबिभर्म्यहंत्वष्टारमु
तपूषणंभगं। अहंदधामिद्रविणंहविष्मते सुप्राव्ये यजमानाय
सुन्वते। अहंराष्ट्रीसंगमनीवसूनांचिकितुषीप्रथमायज्ञियानां।
तांमादेवाव्यदधुःपुरुत्राभूरिस्थात्रांभूर्यावेशयंती। मयासोअन्न २२
मत्तियोविपश्यतियःप्राणितियईंशृणोत्युक्तं। अमंतवोमांतउप

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

क्षियंति॥श्रुधिश्रुतश्रद्धिवंतेवदामि॥अहमेवस्वयमिदंवदामिजुष्टंदे
वेभिरुतमानुषेभिः।यंकामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतं
सुमेधां॥५॥अहंरुद्रायधनुरातनोमिब्रह्मद्विषेशरवेहंतवाउ॥अ
हंजनायसमदंकृणोम्यहंद्यावापृथिवीआविवेश॥अहंसुवेपितर
मस्यमूर्द्धन्ममयोनिरप्स्वन्तःसमुद्रे॥ततोवितिष्ठेभुवनानिविश्वोता
मूंद्यांवर्ष्मणोपस्पृशामि॥अहमेववातइवप्रवाम्यारभमाणाभुव
नानिविश्वापरोदिवापरएनापृथिव्यैतावतीमहिनासंबभूव॥८॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi

Takshashila Project

२३

नतमंहइतिकुल्मलबर्हिषः। अंहोमुग्वाऋषिः। विश्वेदेवादेवताउप
रिष्टाद्बृहतीछंदः। अंत्यात्रिष्टुप्। नतमंहोनदुरितंदेवासोअष्टमर्त्यं।
सजोषसोयमर्यमामित्रोनयंतिवरुणोअतिद्विषः। तद्धिवयंवृणीम प ४
हेवरुणमित्रार्यमन्। येनानिरंहसोयूयंपाथनेथाचमर्त्यमतिद्विषः।
तेनूनंनोयमूतयेवरुणोमित्रोअर्यमा। नयिष्ठाउनोनेषणिपर्षिष्ठाउ
नःपर्षण्यतिद्विषः। यूयंविश्वंपरिपाथवरुणोमित्रोअर्यमा। युष्माकं १३
शर्मणिप्रियेस्यामसुप्रणीतयोअतिद्विषः। आदित्यासोअतिस्रिधो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

वरुणोमित्रोअर्यमा।उग्रंमरुद्भीरुद्रंहुवेमेंद्रमग्निंस्वस्तयेअतिद्वि
षः।नेतारऊषुणस्तिरोवरुणोमित्रोअर्यमा।अतिविश्वानिदुरिता
राजानश्चर्षणीनामतिद्विषः।शुनमस्मभ्यमूतयेवरुणोमित्रोअ
र्यमा।शर्मयच्छंतुसप्रथआदित्यासोयदीमहेअतिद्विषः।यथाहत्य
द्वसवोगौर्यंचित्पदिषिताममुंचतायजत्राः।एवोष्वस्मन्मुंचता
व्यंहः।प्रतार्यग्नेप्रतरंनआयुः॥१०॥आशुःशिशानइति।अप्रतिर
थऋषिः।इंद्रोदेवता।चतुर्थ्याबार्हस्पत्या।उपांत्याप्वादेवत्या।त्रिष्टुप्

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

छंदः॥अंत्यात्रिष्टुप्मारुतीवा॥३॥आशुःशिशानोवृषभोनभीमोघनाघ
नःक्षोभणश्चर्षणीनां॥संक्रंदनोनिमिषएकवीरःशतंसेनाअजयत्सा
कमिंद्रः॥संक्रंदनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना॥
तदिंद्रेणजयततत्सहध्वंयुधोनरइषुहस्तेनवृष्णा॥सइषुहस्तैःसनि
षंगिभिर्वशीसंस्रष्टासयुधइंद्रोगणेन॥संसृष्टजित्सोमपाबाहुशर्ध्यु
ग्रधन्वाप्रतिहिताभिरस्ता॥बृहस्पतेपरिदीयारथेनरक्षोहा॥ २५
मित्राँअपबाधमानः॥प्रभंजंत्सेनाप्रमृणोयुधाजयन्नस्माकमेध्य॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

वितारथानां॥बलविज्ञायस्थविरःप्रवीरःसहस्वान्वाजीसहमानउ
ग्रः॥अभिवीरोअभिसत्वासहोजाजैत्रमिंद्ररथमातिष्ठगोवित्॥गो
त्रभिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा॥इमंसजाता
अनुवीरयध्वमिंद्रंसखायोअनुसंरभध्वं॥६॥अभिगोत्राणिसह
सागाहमानोदयोवीरःशतमन्युरिंद्रः॥दुश्च्यवनःपृतनाषाडयुध्यो
स्माकंसेनाअवतुप्रयुत्सु॥७॥इंद्रआसांनेताबृहस्पतिर्दक्षिणायज्ञःपु
रएतुसोमः॥देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रं॥८॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

स्यवृष्णोवरुणस्यराज्ञआदित्यानांमरुतांशर्धउग्रं।महामनसांभु
वनच्यवानांघोषोदेवानांजयतामुदस्थात्॥उद्धर्षयमघवन्नायुधा
न्युत्सत्वनांमामकानांमनांसि।उद्वृत्रहन्वाजिनांवाजिनान्युद्रथा
नांजयतांयंतुघोषाः॥अस्माकमिंद्रःसमृतेषुध्वजेष्वस्माकंयाइष ३४
वस्ताजयंतु।अस्माकंवीराउत्तरेभवंत्वस्माँउदेवाअवताहवेष्वा॥अ
मीषांचित्तंप्रतिलोभयंतीगृहाणांगान्यप्वेपरेहि।अभिप्रेहिनिर्द २५
हहृत्सुशोकैरंधेनामित्रास्तमसासचंतां॥प्रेताजयतानरइंद्रोवःश

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi

Takshashila Project

र्मयिष्ठंतुउग्रावःसंतुसाह्वोनाधृष्यायथासथाऽसौयासेनामरुतः
परेषामभ्यैतिनऽओजसास्पर्द्धमाना।तांगूहततमसापव्रतेनयथामी
षोऽअन्योऽअन्यंनजानात्॥अंधाऽअमित्राभवताशीर्षाणोऽहयइवा
तेषांवोऽअग्निदग्धानामिंद्रोहंतुवरंवरं॥२६॥विभ्राडितिविभ्राट्ऋ
षिः।सूर्योदेवता।जगतीछंदः।आस्तारपंक्तीरंत्या॥ॐविभ्राड्बृहत्पिब
तुसोम्यंमध्वायुर्दधद्यज्ञपतावविह्रुतं।वातजूतोयोऽअभिरक्षतित्मना
प्रजाःपुपोषपुरुधाविराजति।विभ्राड्बृहत्सुभृतंवाजसातमंधर्म्मंदि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

२५

प१

वोधरुणेसत्यमर्पितं॥अमित्रहावृत्रहादस्युहंतमंज्योतिर्जज्ञेअसुरहा
सपत्नहाइदंश्रेष्ठंज्योतिषांज्योतिरुत्तमंविश्वजिद्धनजिदुच्यतेबृहत्।
विश्वभ्राड्भ्राजोमहिसूर्योदृशाउरुपप्रथेसहओजोअच्युतंविभ्राजंज्यो भा
अ तिषास्वररगच्छोरोचनंदिवः।येनेमाविश्वाभुवनान्याभृताविश्वकर्म
णाविश्वदेव्यावता॥२४॥ॐभूपतेभुवपतेभुवनपतेभूतपतपतेभूता
नांपतेमहतोभूतस्यपतेमृडनोद्विपदेचचतुष्पदेचपशवेमृडनश्च। २६
द्विपदश्चचतुष्पदश्चपशूनयोस्मान्द्वेष्टियंचवयंद्विष्मोदूरात्परोसिसः।

Takshashila Project

ड्डायोधिनामेनातस्यतेधनुर्हृदयंमनइषवश्चक्षुर्विसर्गास्तंत्वातयावेद
नमस्तेअस्तुसोमस्त्वावड्डुमामाहिंसीः।यावरंन्येपतयनोहृकौकंजग
ताविवमहादेवस्यपुत्राभ्यांनवत्राभ्यांनमः।कद्रुद्रायेमहारुद्राया
तिपितद्श्वेमारुद्रायस्थिरधन्वनइतिसूक्तानि॥ॐरुद्रेणां॥ॐकद्रुद्राये।कऽ
एवऋषिःरुद्रोदेवता।गायत्रीछंदः।अंत्यानुष्टुप्॥ॐकद्रुद्रायप्रचेतसे।
मीढुष्टमायतव्यसे।वोचेमशंतमंहृदे।यथानोअदितिकरत्पश्वेन्ट।
न्भ्योयथागवे।यथानोकायरुद्रियं।यथानोमित्रोवरुणोयथारुद्रश्चि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi

केततियथाविश्वेसजोषसः॥ गाथपतिंमेधपतिंरुद्रंजलाषभेषजंत
छंयोःसुम्नमीमहेयःशुक्रइवसूर्योहिरण्यमिवरोचते॥ श्रेष्ठोदेवानां
वसुः॥३॥ शंनःकरत्यर्वतेसुगंमेषायमेष्येनृभ्योनारिभ्योगवे॥ अ
स्मेसोमश्रियमधिनिधेहिशतस्यनृणां। महिश्रवस्तुविनृम्णं। मानःसो
मपरिबाधोमारातयोजुहुरंत॥ आनइंदोवाजेभज॥ यास्तेप्रजाअमृत
स्यपरस्मिंधामंनृतस्य। मूर्द्धानाभासोमवेनआभूषंतीःसोमवेदः॥९॥
इमारुद्रायेतिकुत्सःऋषिः। रुद्रोदेवता। जगतीछंदः। अंत्येद्वेत्रिष्टुभौ॥ ॥ २७

Takshashila Project

इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः।यथाशमसद्द्वि
पदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्ननातुरं॥मृळानोरुद्रोतनोमय
स्कृधिक्षयद्वीरायनमसाविधेमते।यच्छंचयोश्चमनुरायेजेपितातद
श्यामतवरुद्रप्रणीतिषु॥अश्यामतेसुमतिंदेवयज्ययाक्षयद्वीरस्यत
वरुद्रमीढ्वः।सुम्नायन्निद्विशोअस्माकमाचरारिष्टवीराजुहवामतेह
विः॥त्वेषंवयंरुद्रंयज्ञसाधंवंकुंकविमवसेनिह्वयामहे।आरेअस्मद्दै
व्यंहेळोअस्यतुसुमतिमिद्वयमस्यावृणीमहे।दिवोवराहमरुषं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

कपर्द्दिनं त्वेषंरूपंनमसानिह्वयामहे । हस्ते बिभ्रद्भेषजावार्य्याणिशर्म्मा
र्म्मवर्म्मच्छर्दिरस्मभ्यंयंसत् ॥ ३ ॥ इदंपित्रेमरुतामुच्यतेवचः स्वादोः
स्वादीयोरुद्रायवर्द्धनं । रास्वाचनोअमृतमर्त्तभोजनंत्मनेतोकायत
नयायमृड ॥ ४ ॥ मानोमहान्तमुतमानोअर्भकंमानउक्षन्तमुतमानउक्षि
तं । मानोवधीःपितरंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः । मानस्तोके
तनयेमानआयौ । मानोगोषुमानोअश्वेषुरीरिषः । वीरान्मानोरुद्र १०
भामितोवधीर्हविष्मंतःसदमित्वाहवामहे ॥ ६ ॥ उपतेस्तोमान्पशुपाइ

१ मात३

स्वापित

वाकरंरा[illegible]मरुतांसुम्नमस्मेभद्राहितेसुमतिर्मृळयत्तमाःथव
यमवइत्तेवृणीमहे॥आरेतेगोघ्नमुतपूरुषघ्नंक्षयद्वीरसुम्नमस्मेते
अस्तुमृळाचनोअधिचब्रूहिदेवाधाचनःशर्मयच्छद्विबर्हाः॥अवो
चामनमोअस्माअवस्यवःशृणोतुनोहवंरुद्रोमरुत्वान्॥तन्नोमित्रो
वरुणोमामहंतामदितिःसिंधुःपृथिवीउतद्यौः॥११॥४॥आतेपीवरि
नि॥गृत्समदऋषिःरुद्रोदेवतात्रिष्टुप्छंदः॥आतेपितर्मरुतांसु
म्नमेतुमानःसूर्यस्यसंदृशोयुयोथाः॥अभिनोवीरोअर्वतिक्षमेतप्र

Takshashila Project

१९

जायेमहिरुद्रप्रजाभिः।त्वादत्तेभीरुद्रशंतमेभिःशतंहिमाअशी
यभेषजेभिः।व्य१स्मद्द्वेषोवितरंव्यंहोव्यमीवाश्चातयस्वाविषूचीः।श्रे
ष्ठोजातस्यरुद्रश्रियासितवस्तमस्तवसांवज्रबाहो।पर्षिणःपारम
हसःस्वस्तिविश्वाअभीतीरपसोयुयोधि।मात्वारुद्रचुक्रुधामानमो
भिर्मादुष्टुतीवृषभमासहूती।उन्नोवीरांअर्पयभेषजेभिः।भिषक्त
मंत्वाभिषजांशृणोमि।हवीमभिर्हवतेयोहविर्भिरवस्तोमेभीरुद्रं। १९
दिषीय।ऋदूदरःसुहवोमानोअस्यैबभ्रुःसुशिप्रोरीरधन्मनायै।।३५।। ।

सं ह्

ना
म्न

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

उन्मामममंदवृषभोमरुत्वांत्वक्षीयसावयसानाधमानंघृणीवछाया
मरपाअशीयाविवासेयंरुद्रस्यसुम्नं।कस्यतेरुद्रमृळयाकुर्हस्तोयो
अस्तिभेषजोजलाषः।अपभर्त्तारपसोदैव्यस्याभीनुमावृषभचक्ष
मीथाः।प्रबभ्रवेवृषभायश्वितीचेमहोमहींसुष्टुतीमीरयामिनः
मस्याकल्मलीकिनंनमोभिर्गृणीमसित्वेषंरुद्रस्यनाम।स्थिरेभिरंगैः
पुरुरूपउग्रोबभ्रुःशुक्रेभिःपिपिशेहिरण्यैः।ईशानादस्यभुवनस्य
भूरेर्नवाउयोषद्रुद्रादसुर्यं।अर्हन्बिभर्षिसायकानिधन्वार्हन्निष्कंय

वि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi

जतं विश्वरूपं। अर्हन्निदं दयसे विश्वमभ्वं नवा ओजीयो रुद्र त्वदस्ति॥
॥१०॥ स्तुहि श्रुतं गर्त्तसदं युवानं मृगंन भीममुपहत्नुमुग्रं। मृळा ज
रित्रे रुद्र स्तवानो न्यं ते। अस्मन्नि वपन्तु सेनाः। कुमारश्चित्पितरं व
न्दमानं प्रति नानाम रुद्रोपयन्तं। भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं
भेषजा रास्यस्मे। या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या
मयोभु। यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि॥ २०
परि णो हेती रुद्रस्य वृज्याः। परि त्वेषस्य दुर्मतिर्मही गात्। अव स्थिरा म त्रिम ९

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

श्री ।

वद्भ्य स्तनुष्व मीढ्व स्तोकायतनयाय मृळ । एवा बभ्रो वृषभ चेकितान
यथा देव न हृणीषे न हंसि । हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे
सुवीराः ॥ ३ ॥ इमा रुद्राय स्थिरधन्वन इति वसिष्ठ ऋषिः रुद्रो देव
ता । त्रिष्टुप् छंदः । इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने
। अषाळ्हाय सहमानाय वेधसे । तिग्मायुधाय भरता शृणोतु नः । स
हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति । अवन्नवंतीरुप
नो दुरश्चरानमीवो रुद्र जासु नो भव । या ते दिद्युदवसृष्टा दिवस्परि क्ष्मा या

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

सा वरतिपरिणोवृणक्तुनः।सहस्रंतेस्वपिवातभेषजामानस्तोकेषुतनये
पू रिरीषः।मानोवधीरुद्रमापरादामातेभूमप्रसितौहीळितस्य।आनो
भजबर्हिषीजीवशंसेयूयंपातःस्वस्तिभिःसदानः।।४।।३सोमारुद्रा
धारयेति।भरद्वाजऋषिःसोमारुद्रौदेवत्यौ।त्रिष्टुप्छंदः।आवर्त्यात्रेऽ
थीत्रैष्टुभी।।३सोमारुद्राधारयेथामसुर्यं१प्रवामिष्टयोरमश्नुवंतुद
मेदमेसप्तरत्नादधाना।शंनोभूतंद्विपदेशंचतुष्पदे।सोमारुद्राविवृ २२
हतंविषूचीममीवायानोगयमाविवेश।आरेबाधेथांनिरृतिंपराचैः

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

रस्मेभद्रासौश्रवसानिसंतु॥सोमारुद्रायुवमेतान्यस्मेविश्वातनूषुभे
षजानिधत्तं॥अवस्यतंमुंचतंयन्नोअस्तितनूषुबद्धंकृतमेनोअस्मत्॥
तिग्मायुधौतिग्महेतीसुशेवौसोमारुद्राविहसुमृळतंनः॥प्रनोमुंचतं
वरुणस्यपाशाद्गोपायतंनःसुमनस्यमाना॥४॥रुद्राणामेतिप्रदिशा
विचक्षणोरुद्रेभिर्योषातनुतेपृथुज्रयः॥इंद्रंमनीषाअभ्यर्चतिश्रुतं
मरुत्वंतंसख्यायहवामहे॥४॥आवोराजानमध्वरस्यरुद्रंहोतारंसत्य
यजंरोदस्योः॥अग्निंपुरातनयित्नोरचित्ताद्धिरण्यरूपमवसेकृणुध्वं॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

कधिष्ण्यासुदधसानोऽग्नेकद्धातायव्रतवसेशुनंयेपरियन्नेनासत्या

यज्ञेभ्रुवःकसोदग्नेरुद्रामृघ्नेऽस्मेरुद्रामेहनापर्वतासोवृत्रहत्येन

रहूतौसजोषाःयश्चासतेस्तुवतेधायिपज्रइंद्रज्येष्ठाऽस्मांअवंतुदेः

वाः त्र्यंबकंयजामहे॥ ॥३॥ ॥इतिरुद्रजाप्यसंपूर्णं॥ ॥संवत् १७

६५ वर्षेमार्गशीर्षवदि ८ नौमेऽम्रमहावादवास्तव्यंनागरसाठोदराज्ञाती

य त्रि० नाणजीसुतत्रि० कीकालिखितंमिदं॥ ॥नागरसाठोदराज्ञाती

यमेहेताबामजीसुतमेहेताकमलजीपठनार्थं॥ शुभंमस्तु॥ ॥श्री॥ २२

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.